नं० ४५११-घ

बृहस्पतिप्रपंचिः

नं० ४५११-घ

पत्राणि ७ (सप्त)

4511
F = 7

नं० ४५११-घ
वृहस्पति शान्तिः
पत्राणि ७ (सप्त)

त्रि॥ सवितादत्तस्येदम्पुस्तकम् बृहस्पतिशांतिः पत्राणि ७

बृहस्पतिग्र शांतिः

श्रीगणेशाय नमः। अथ बृहस्पतिशान्तिः। तत्रासादनक्रमः। शुद्धोदकपात्रं।
श्रीफलानि। कुंकुमं। स्थापनार्थं श्वेतवस्त्रौ। ग्रहाणांच प्रतिमाद्वयं। अष्टौ
कलशाः। ग्रहाणां कलशी। चरुतंत्रेण पात्रासादनं। कलशोपच्छेपार्थवस्त्रानि।
गोरोचन हरितालमनःशिलाप्रियंगु सहदेवी।। यवव्रीहि प्रियंगु सर्षपपय
दीमधुशातावरीजातीपत्रा। चंदनकुंदपुष्पं वालकं पद्मकं अश्वगंधामूरमांसि
हरिद्राकाञ्चनं बालरुणपञ्चक्रांतो वचादारु अपामार्गपिप्पलीमूलधात्री
अगरपघदार्व्यं।। तत्र प्रधानसंकल्पे। देशकालौ संकीर्त्य मम सुतस्य
वा सुतायाः विवाहनिमित्तं उपनयननिमित्तं वा दुःस्थानस्थितस्य गुरोः

सानुकूल्यार्थंस्वशाखोक्तविधिनाबृहस्पतेःशांतिकर्माहंकरिष्ये।इतिसंक
ल्पः।ततोमातृपूजा।कृत्यश्राद्धादिमातृपूजायांबृहस्पतेःशांतिकर्माहंक
रिष्येइतिसंकल्प्यतदंगत्वेनविहितंगौर्यादिचतुर्दशमातृणामित्यादिसं
कल्पे।नांदीश्राद्धादिसंकल्पेप्येवमेव।ऋत्विग्वरणं।तत्रबृहस्पतेःशांता
हंयक्ष्ये।तत्रमेत्वमाचार्योभव।ब्रह्माभव।ऋत्विग्भव।ऋत्विजोष्टौब्रह्मा
आचार्यश्च।ततस्तेषांवरणार्चनं।स्वस्तिवाचनं।ब्राह्मणानांप्रार्थना।त
तआचार्यःकर्मारंभंकुर्यात्।आदौपंचगव्येनप्रोक्षणं।पंचभूसंस्कारा।त
पूर्ववरदनामानमग्निंप्रतिष्ठापयामीत्यग्निंधाय।अग्नेःस्थापनं।समि

२

धोमः। तल्पपरिसमूहने। ब्रह्मोपवेशन पात्रासादनादि सर्वं प्राकृतं। ए

षदाज्यस्यासादने। दधिमध्वाज्य संयुक्तं तत्पृषातकमुच्यते। तस्यासाद

नमाज्यासादनानंतरं। बृहस्पतये त्वाजुष्टं निर्वपामीति गुरोः पृषत्क चरुः।

यहाणां च। द्वितीयः प्रकृतिवत्। ततः कुंडात् उत्तरस्यां त्रिंशांगुलांतरे च

तुरस्रहस्तमानां चतुरंगुलोछ्रांवेदि निर्माय। तत्राहतवस्त्रमास्तीर्य

तदुपरि दीर्घं चतुरस्रं मंडलं त्वाशक्त्यनुसारेण सुवर्णनिर्मितां गु

रोर्मूर्तिं अग्न्युत्तारणपूर्वकं तांम्रनिमांतंदुलपुंजोपरि संस्थाप्य त

त्र बृहस्पतिमावाहयेत्। पूर्ववत्। पूर्वस्यां प्रजापतेः स्थापनावाहने। ॥२॥

2

मध्ये वेंद्रस्य। अश्विनामवृस्याग्नेः स्थापनं। उत्तराफाल्गुनीनिधानेन
क्षत्रस्य। एवं संस्थाप्य। कुंडादैशान्यां यथावद्ग्रहाणां स्थापनं। ततो बृ
हस्पतिपीठे परितो दिक्षु यथाविधिना अष्टौ कलशाः स्थापनीयाः।
ततस्तेषु प्रागादिक्रमेण वक्ष्यमाणवस्तूनां प्रक्षेपः। यथा गोरोचना हरि
तालमनःशिलाप्रियंगुसहदेवीति पंचैताः प्रथमकलशे। अग्निमीळे
ति प्रक्षेपमंत्रः। यवव्रीहिप्रियंगुसर्षपगोरोचनायष्टीमधुशालावरी
जातिपत्राण्यष्टौ दक्षिणकलशे तत्र ईषे त्वेति। चंदनकुंदपुष्पवालकं
चैतद्वस्तुचतुष्टयं अग्न आयाहीति पश्चिमे। अश्वगंधामुरमांसीह

रिद्राचेतिशंनोदेवीत्युत्तरे।अरिष्टकाव्रजंघालक्ष्मणगोचक्रांक्राब्रह्मय
ज्ञानइशानेववाराकहरिद्राअपामार्गंशंगराजेनिइदंविष्णुआग्नेय्यां।
कुंदरुपिप्पलीमूलधात्रीचेतिआवोराजेनिनिर्ऋत्यां।कुंकुमरक्तचंद
नमगरुवायव्येगायत्र्यात्क्षिपेत्।ततोग्रहपीठैशान्यांस्थापितकुं
भेसर्वौषसर्वंप्रक्षिप्यवरुणमावाह्य।अपाष्टवृक्षशानोमभिमंत्र
णं।कद्रुद्रंहिता।राज्ञोक्षाणि।अप्रतीरथं।समुद्रायेनाभिमंत्रणं।
अपसागादिक्रमेणप्रपगभिमंत्रणौ।गिर्वणःपाहिनःसुतम्।इमम७
स्तो२२४माम्।इमं८स्तोमभितिसूक्तत्रयं।सरवायआइतिसामर्पचा। ॥३॥

त्रातारमिंद्र।अग्नीरक्षांसि।एतानि पूर्वकुंभे।य८ रक्षांसि।नाकेसुपर्णं।अग्निर्वा
पूर्वपीतये।एतानि दक्षिणे।यद्यद्य दात्रीणि।आनोमित्रा।घृतवतीं।
आयुष्यं चक्षुर्ज्योतिः।एतानि पश्चिमे।नवोनवः।सोमवर्गः।इदाद्यमे।सोमः
पवतेवर्गः।आप्यायस्वसमेतुते।एतानि उत्तरे।अग्निर्वा सदइति द्वौ।न
इंद्राद्दाम।एतान्यैशान्यां।नक्षोधनैः।उद्गाधि।आग्नाउरवधवा।तिग्मेना
२० इति द्वौ।आग्नाउरवधवा।उज्जिष्ठ।२०।आगीना।इति आग्नेय्यां।वैश्वा
हिनर्हंतीनाम।अग्निर्वाअश्वरनोनुमोवा।इति नैर्ऋत्यां।वात आवातु।
प्राणाधिप्रस्वदिनि वर्गः।एतानि वायव्ये।एवंकलशानामभिमंत्रणं।प्राति

ष्ठां कुर्यात्। प्रतिष्ठामंत्रो पठित्वा। अथ समस्तपुण्यकालावयवयोगेषु अग्नि
न्यां आदित्याद्या ग्रहाः सबृहस्पतिग्राः स्वस्वपीठस्थिताः सर्वलक्षणाः सुप्र
तिष्ठिता वरदा भवंतु। ततः पूजा। तत्र पूर्वं गुरोः पूजा। अथेत्यादि तिथौ अस्य
कुमारस्य कुस्थानस्थितबृहस्पतिजनितपीडोपशांतये बृहस्पतेः पूजाम
हं करिष्ये इति संकल्प्य उक्त चंदनपुष्पधूपनैवेद्यफलादिभिः संपूज्य कल
शे वरुणं च संपूज्य ग्रहपीठे ग्रहान् यथावत् संपूज्य तत्रस्थकलशे वरुणं सं वि
नीयेत्। ततः स्वकुण्डेपि स्थंडिले वा। आघाराज्यभागांतं कृत्वा सर्वं कर्त्तव्यं।
तत्र पृषदाज्यसंप्रयोगेत्स्रवने कृत्वा आज्यस्थाल्यां उत्तरस्यां पृषदाज्यस्था ॥६॥

स्नादनी। आज्यसंस्कारानंतरं पृषदाज्यस्य संस्कारः। अहुनि वदाज्यजा
गो जुह्वा स्रुचि स्रुवेण चतुर्गृहीतं पृषदाज्यमादाय। सोमं राजानमिति द्वि
चा जुहुयात्। इदं बृहस्पतये न मम। पुनश्चतुर्गृहीतमादाय। यशोम। द्यावापृ
थिवी इति जुहुयात्। इदमिंद्राय बृहस्पतिभ्यां न मम। इंद्र बृहस्पतिभ्य। मित्रिवा
एवं वृयान्। श्वित्रान् तृतीया। कस्त्वा सत्यो मदे इति चतुर्थी। अग्नी क्षुणइ इति पं
चमी। बृहस्पते परिदीया रथेनेति। ष्ठी। इंद्र आसान्नेता इति सप्तमी। स्व
स्तिन इंद्रेत्यष्टमी। इदं बृहस्पतये न ममेति सर्वत्र त्यागः। एवमष्टवाहुत
यः पृषदाज्येन जुहुयात्। बृहस्पति वरुणाव तस्याहुति होतव्या। ताभ्यम्

हुतिवत्। तत्रमंत्राः। उपत्वाजामयइतिप्रथमा। नवोहिंद्रावमम्नितिद्वितीया।
अग्निःहोतामितितृतीया। प्रजापतेनत्वदेतान्यन्यइतिचतुर्थी। अथोक्त
होममंत्राणामृष्यादयः। सोमःराजेतिअग्निरनुष्टुप्बृहस्पतिः। यशोमा
द्यावाइतिअगस्त्योज्योतिष्मतीजगतीबृहस्पतिः। विश्वेदेवा। कयान
श्चित्रइतितिसृणांवामदेवोगायत्रीबृहस्पतिः। प्रजापतिर्वा। बृहस्
तेइत्यप्रतिरथस्त्रिष्टुप्बृहस्पतिः। इंद्रआसांनेताइतिअप्रतीरथ
स्त्रिष्टुबिंद्राबृहस्पती। स्वस्तिनइतिअप्रतिरथः त्रिस्वराट्त्रि
ष्टुप् विश्वेदेवाः। बृहस्पतिर्वाप्रवरणान्ते। एतेमंत्राः पृषदाज्यहोमेषु। ॥५॥

अथचरुहोमेषु।उपयाजाइति अग्निर्गायत्रीबृहस्पतिः।तवेदिंद्रइतिवसि
स्प ष्ठोबृहती।अग्निंहोतारमितीपरुच्छेपोत्यष्टिर्बृहस्पतिः।प्रजापतइतिवसि
ष्ठस्त्रिष्टुप्बृहस्पतिः।होमेविनियोगइतिसर्वत्र।इदंबृहस्पतयेनममेतिसर्वत्र
त्यागः।ततोऽभिषेकः।बृहस्पतिपीठात्पश्चिमतःस्वस्तिकंविधायतदु
परिरक्तमानडुहंचर्मास्तीर्यतत्रकन्यांबटुकंवाउपवेश्यतस्यमूर्ध्निसक
लामौदुंबरशाखांसन्यस्यआवाहयोनिषिंचेत्।प्रथमंतत्रपूर्वंकलशा
द्वक्स्थंजलंपात्रांतरेक्रमेणादायबृहस्पतेपरिदीयाख्येनेतिमंत्रेण।
ष्टोत्तरशतंतज्जलमभिमंत्र्यतस्यकुमारस्यकुमार्यावादुःस्थानास्थि

5

नवहस्यानिवृतपीडोपशांतयेऽग्निषेकमहं वृरिष्य इत्यग्निधायऽग्नि
षेकलिंगमंत्रैः शन्नोदेव्यापोहिष्ठीयाग्निरित्यादिरग्निषेकः कार्यः। त
तस्त्विभिः स्वस्वकलशेन। पृषकूटपकूकार्यः। पूर्वकुंभमादाय।
अग्निखा भ्रूरेतिमंत्रेण निषेकः कार्यः। त्रातारमिंद्रमवितामिति
6 दक्षिणे। एनो न्विंद्रः स्तवामेति पश्चिमे। उपास्मै गायतानइत्यादि
नवा। तरक्षमंदीतिचतस्रः। एतान्स्वव्रनरकलशे। अग्निस्त्वाभूर
इतिपुनरीशानकुंभे। अग्निस्तिग्मेनेत्यादिनाग्नेयकुंभे। वेत्याहि ॥६॥
नर्ऋतिनिर्ऋतिकुंभे। वातआवातिति वायव्यकुंभे। सहस्राक्षो॰। न

गंते॰। यत्रैकेशेषु॰। समुद्रागिरियो नद्यो मुनयश्च पतिव्रताः। दौर्भाग्यं घ्नं
तु ते सर्वे शांतिं यच्छंतु सर्वदा। एवमभिषेकं कृत्वा स्नापयित्वा धौते शुक्ले वा
ससी परिधापयेत्। ततो ग्रहाणां चरु होमः। चरु मंत्रैराज्याहुतयः।
ततः समिद्धोमादि तत्कर्म होमांतं कृत्वा। बृहस्पते र्ग्रहाणां च पूजा।
पीतवस्त्रेण बृहस्पतेराच्छादनं। बृहस्पतिर्बृहत्तेज इति प्रार्थना। ततः
मन्त्रांते संस्कार्य हस्तेनार्घं दापयेत्। पात्रे दध्यक्षतपुष्पादि कृत्वा हस्ता
भ्यां तत्पात्रमादाय रूपं देहि जयं देहि भर्तारं धर्मवत्सलं। पुत्रान्देहि
धनं देहि सर्वान्कामांश्च देहि मे। बडुबश्चेतन्नार्घ्यं भगवन्देहि मे इति

पाठः। इत्यर्घं दत्वा प्रणमेत्। महालक्ष्मीं च। ततो यथावत्पूजा। ततः प्राय
श्चित्तं कृत्वा। चरुद्वयमेव होमं कृत्य स्विष्टकृतं हुत्वा पूर्णाहुतिं बलिदानं च
कृत्वा तंत्रशेषं समापयेत्। आचार्याय सुवर्णरूपी नवस्त्रं गां च द
क्षिणां दद्यात्। इतरेभ्यः सहिरण्यं पीतं वासः पूर्णपात्रं ब्राह्मणेभ्यः। ग्रहा
णां यथावद्दक्षिणां दत्वा आचार्यं ब्रह्माणं प्रणम्य विसर्जयेत्॥
इति बृहस्पतिशांतिः समाप्तः। संवत् १८ वर्षे पूर्विमास्तावलम्बुके १ सो
मे। काश्यां लिपिकृता। त्रि। वांकु। श्रा। त्रि। कल्याण त्रि। गोवर्धन त्रि। ग ॥७॥
दाधरात्मजसविता दत्तेन नागर धनुरामौ कृधिया। शुभं भूयात्॥